श्री ऋषभदेवस्वामिने नमः ।

श्री शान्तिनाथाय नमः । श्री नेमिनाथाय नमः ।

श्री शङ्खेश्वरपार्श्वनाथाय नमः । श्री महावीरस्वामिने नमः ।

श्री गौतमस्वामिने नमः । श्री सद्गुरुभ्यो नमः ॥

ॐ श्रीँ ह्रीँ अर्हँ नमः ।

आचार्यभगवत्-कलिकालसर्वज्ञश्रीहेमचन्द्रसूरिप्रणीतं

स्वोपज्ञलघुवृत्तिविभूषितं

# श्रीसिद्धहेमचन्द्रशब्दानुशासनम् ॥

प्रणम्य परमात्मानं श्रेयः शब्दानुशासनम् ।
आचार्यहेमचन्द्रेण स्मृत्वा किञ्चित् प्रकाश्यते ॥१॥

अर्हँ ॥१।१।१॥

अर्हँ इत्येतदक्षरं परमेश्वरस्य परमेष्ठिनो वाचकं मङ्गलार्थं शास्त्रस्याऽऽदौ प्रणिदध्महे ॥१॥

सिद्धिः स्याद्वादात् ॥१।१।२॥

स्याद्वादाद् अनेकान्तवादात् प्रकृतानां शब्दानां सिद्धिः निष्पत्तिर्ज्ञप्तिश्च वेदितव्या ॥२॥

लोकात् ॥१।१।३॥

अनुक्तानां संज्ञानां न्यायानां च लोकाद् वैयाकरणादेः सिद्धिर्ज्ञप्तिर्वेदितव्या, वर्णसमाम्नायस्य च ॥३॥ तत्र-

औदन्ताः स्वराः ॥१।१।४॥

---

१. १।१।१ त आरभ्य ७।४।१५६ पर्यन्तमस्य सर्वोऽपि लघुवृत्त्यंशोऽस्माभिः हस्तलिखितादर्शैः सम्यक्तुल्ला- पा१,२,३, खं१,२,३, ला३ । एषां सङ्केतः स्वरूपं प्रस्तावनातोऽवगन्तव्यम् ॥ २. अर्हमित्यपि खं१, पा२, ला३ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org